# तृतीयः पाठः  सूक्तिसुधा। (कण्ठस्थीकरणार्थम्)

सूक्तयः नाम सुवचनानि । सूक्तीनां पठनेन वाक्चातुर्यं वर्धते । सूक्तीनां प्रयोगः लेखने भाषणे च प्रभावं जनयति । उक्तमेव-

खिन्नं चापि सुभाषितेन रमते स्वीयं मनः सर्वदा
श्रुत्वान्यस्य सुभाषितं खलु मनः श्रोतुं पुनर्वाञ्छति ।
अज्ञान् ज्ञानवतोऽप्यनेन हि वशीकर्तुं समर्थो भवेत्
**कर्तव्यो हि सुभाषितस्य मनुजैरावश्यकः सङ्ग्रहः ।।**

**वृत्तम् – शार्दूलविक्रीडितम्**

विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम्
विद्या भोगकरी यशःसुखकरी विद्या गुरूणां गुरुः।
विद्या बन्धुजनो विदेशगमने विद्या परं दैवतम्
विद्या राजसु पूज्यते न तु धनं **विद्याविहीनः पशुः**।।१।। –नीतिशतकात्

सन्धिविग्रहाः – १) रूपमधिकम् = रूपम् + अधिकम् । २) बन्धुजनो विदेशगमने = बन्धुजनः + विदेशगमने ।

अन्वयः – विद्या नाम नरस्य अधिकं रूपम्, प्रच्छन्नगुप्तं धनम्, विद्या भोगकरी यशःसुखकरी (च) । विद्या गुरूणां गुरुः । विदेशगमने विद्या बन्धुजनः । विद्या परं दैवतम् । विद्या राजसु पूज्यते न तु धनम्। विद्याविहीनः पशुः (एव) ।

**वृत्तम् – वसन्ततिलका**

निन्दन्तु नीतिनिपुणा यदि वा स्तुवन्तु
लक्ष्मीः समाविशतु गच्छतु वा यथेष्टम् ।
अद्यैव वा मरणमस्तु युगान्तरे वा
**न्याय्यात्पथः प्रविचलन्ति पदं न धीराः**।।२।। –नीतिशतकात्

सन्धिविग्रहाः – १) नीतिनिपुणा यदि = नीतिनिपुणाः + यदि   २) अद्यैव = अद्य + एव ।
३) मरणमस्तु = मरणम् + अस्तु ।   ४) न्याय्यात्पथः = न्याय्यात् + पथः ।

अन्वयः – यदि (अपि) नीतिनिपुणाः निन्दन्तु स्तुवन्तु वा, लक्ष्मीः समाविशतु यथेष्टं गच्छतु वा, मरणम् अद्य एव अस्तु युगान्तरे वा, (तथापि) धीराः न्याय्यात् पथः पदं न प्रविचलन्ति ।

**वृत्तम्– अनुष्टुप्**

आत्मनो मुखदोषेण बध्यन्ते शुकसारिकाः।
बकास्तत्र न बध्यन्ते **मौनं सर्वार्थसाधनम्**।।३।। –पञ्चतन्त्रात्

सन्धिविग्रहाः – १) आत्मनो मुखदोषेण = आत्मनः + मुखदोषेण । २) बकास्तत्र = बकाः + तत्र।

अन्वयः – शुकसारिकाः आत्मनः मुखदोषेण बध्यन्ते । तत्र बकाः न बध्यन्ते । (अतः) मौनं सर्वार्थसाधनम् ।

**वृत्तम् – शिखरिणी**

रथस्यैकं चक्रं भुजगयमिताः सप्त तुरगाः
निरालम्बो मार्गश्चरणविकलः सारथिरपि।
रविर्यात्येवान्तं प्रतिदिनमपारस्य नभसः
**क्रियासिद्धिः सत्त्वे भवति महतां नोपकरणे**।।४।। –भोजप्रबन्धात्

सन्धिविग्रहाः – १) रथस्यैकम् = रथस्य + एकम् । २) मार्गश्चरणविकलः = मार्गः + चरणविकलः ।
३) सारथिरपि = सारथिः + अपि । ४) रविर्यात्येवान्तम् = रविः + याति + एव + अन्तम् ।
५) प्रतिदिनमपारस्य = प्रतिदिनम् + अपारस्य । ६) नोपकरणे = न + उपकरणे ।

**अन्वयः** – रथस्य एकं चक्रं, सप्त भुजगयमिताः तुरगाः, निरालम्बः मार्गः, सारथिः अपि चरणविकलः, (तथापि) रविः प्रतिदिनम् अपारस्य नभसः अन्तं याति एव । महतां क्रियासिद्धिः सत्त्वे भवति, उपकरणे न (भवति) ।

**वृत्तम्–अनुष्टुप्**

अल्पानामपि वस्तूनां **संहतिः कार्यसाधिका।**
तृणैर्गुणत्वमापन्नैर्बध्यन्ते मत्तदन्तिनः ।।५।। – हितोपदेशात्

सन्धिविग्रहाः – १) अल्पानामपि = अल्पानाम् + अपि ।
२) तृणैर्गुणत्वमापन्नैर्बध्यन्ते = तृणैः + गुणत्वम् + आपन्नैः + बध्यन्ते ।

**अन्वयः** – अल्पानां वस्तूनाम् अपि संहतिः कार्यसाधिका (विद्यते) । (यथा) गुणत्वम् आपन्नैः तृणैः मत्तदन्तिनः बध्यन्ते ।

**वृत्तम्–मालिनी**

प्रथमवयसि पीतं तोयमल्पं स्मरन्तः
शिरसि निहितभारा नारिकेला नराणाम् ।
ददति जलमनल्पास्वादमाजीवितान्तं
**न हि कृतमुपकारं साधवो विस्मरन्ति** ।।६।। – विक्रमचरितात्

सन्धिविग्रहाः – १) तोयमल्पम् = तोयम् + अल्पम् । २) कृतमुपकारम् = कृतम् + उपकारम् ।
३) साधवो विस्मरन्ति = साधवः + विस्मरन्ति ।
४) जलमनल्पास्वादमाजीवितान्तम् = जलम् + अनल्पास्वादम् + आजीवितान्तम् ।
५) निहितभारा नारिकेला नराणाम् = निहितभाराः + नारिकेलाः + नराणाम्

**अन्वयः** – प्रथमवयसि पीतम् अल्पं तोयं स्मरन्तः शिरसि निहितभाराः नारिकेलाः आजीवितान्तं नराणां (नरेभ्यः) अनल्पास्वादं जलं ददति । साधवः कृतम् उपकारं न हि विस्मरन्ति ।

**वृत्तम्–अनुष्टुप्**

घटं भिन्द्यात् पटं छिन्द्यात् कुर्याद्रासभरोहणम् ।
**येन केन प्रकारेण** प्रसिद्धः पुरुषो भवेत् ।।७।। –हास्योक्तिः

सन्धिविग्रहाः – १) कुर्याद्रासभरोहणम् = कुर्यात् + रासभरोहणम् । २) पुरुषो भवेत् = पुरुषः + भवेत् ।

**अन्वयः** – पुरुषः घटं भिन्द्यात्, पटं छिन्द्यात्, रासभरोहणं (अपि) कुर्यात् । येन केन प्रकारेण (सः) प्रसिद्धः भवेत् ।

## भाषाभ्यासः



**श्लोकः १**

**१. पूर्णवाक्येन उत्तरत ।**

अ) का गुरूणां गुरुः ?
आ) किं राजसु न पूज्यते ?
इ) कः पशुः एव ?

**२. माध्यमभाषया उत्तरत ।**

अ) ‘विद्या नाम नरस्य’ . . . इति श्लोकाधारेण विद्यायाः महत्त्वं लिखत ।

**३. जालरेखाचित्रं पूरयत ।**

विद्या →
- प्रच्छन्नगुप्तं ________ ।
- गुरूणां ________ ।
- परं ________ ।
- नरस्य अधिकं ________ ।

श्लोकः २.

**१. मञ्जूषातः उचितं शब्दं चित्वा तालिकां पूरयत ।**

| | | | |
|---|---|---|---|
| नीतिनिपुणाः | ______ | ______ | वा |
| ______ | समाविशतु | ______ | वा |
| ______ | अद्यैव | ______ | वा |

(निन्दन्तु, गच्छतु, युगान्तरे, मरणम्, लक्ष्मीः, स्तुवन्तु ।)

**२. सन्धिविग्रहं कुरुत ।**

अ) मरणमस्तु । आ) अद्यैव ।

**३. माध्यमभाषया उत्तरत ।**

''न्याय्यात्पथः प्रविचलन्ति पदं न धीराः ।' इति सूक्तिं स्पष्टीकुरुत ।

श्लोकः ३.

**१. पूर्णवाक्येन उत्तरत ।**

अ) शुकसारिकाः केन बध्यन्ते ?

आ) के न बध्यन्ते ?

**२. सन्धिविग्रहं कुरुत ।**

अ) बकास्तत्र आ) आत्मनो मुखदोषेण

श्लोकः ४.

**१. पूर्णवाक्येन उत्तरत ।**

अ) रवेः रथस्य कति तुरगाः सन्ति ?

आ) रवेः सारथिः कीदृशः अस्ति ?

**२. सन्धिविग्रहं कुरुत ।**

अ) रथस्यैकम् । आ) सारथिरपि ।

**३. मञ्जूषातः शब्दं चित्वा तालिकां पूरयत ।**

| | |
|---|---|
| निरालम्बः | ______ |
| ______ | तुरगाः |
| चरणविकलः | ______ |
| ______ | चक्रम् |

(मार्गः, सारथिः, एकम्, सप्त ।)

**४. जालरेखाचित्रं पूरयत ।**

रवेः क्रियासिद्धौ प्रत्यूहाः

- रथस्य एकं ______ ।
- ______ मार्गः ।
- ______ सप्त तुरगाः ।
- चरणविकलः ______ ।

**४. माध्यमभाषया उत्तरत ।**

'क्रियासिद्धिः सत्त्वे भवति' इति सूर्यस्य उदाहरणेन स्पष्टीकुरुत ।

श्लोकः ५.

**१. पूर्णवाक्येन उत्तरत ।**

अ) का कार्यसाधिका भवति ?

आ) कैः मत्तदन्तिनः बध्यन्ते ?

**२. सन्धिविग्रहं कुरुत ।**

अ) अल्पानामपि आ) तृणैर्गुणत्वमापन्नैर्बध्यन्ते

**३. माध्यमभाषया उत्तरत ।**

'संहतिः कार्यसाधिका' इति सूक्तिं स्पष्टीकुरुत ।

श्लोकः ६.

**१. पूर्णवाक्येन उत्तरत ।**

अ) साधवः किं न विस्मरन्ति ?

आ) नारिकेलाः किं स्मरन्ति ?

इ) नारिकेलाः भारं कुत्र वहन्ति ?

**२. माध्यमभाषया उत्तरत ।**

नारिकेलाः नराणाम् उपकारं कथं स्मरन्ति ?

श्लोकः ७.

**१. एकवाक्येन उत्तरत ।**

अ) नरः किं छिन्द्यात् ?

आ) मनुजः किं भिन्द्यात् ?

**२. श्लोकात् लिङ्लकारस्य रूपाणि चित्वा लिखत ।**

**३. माध्यमभाषया उत्तरत ।**

'येन केन प्रकारेण' इति उक्तिं स्पष्टीकुरुत ।

**१. समानार्थकशब्दान् लिखत ।**

विद्या, पशुः, धनम्, लक्ष्मीः, शुकः, तुरगः, नभः, रविः, संहतिः, दन्ती, तोयम्, शिरः, साधवः, पटम्, रासभः ।

**२. विरुद्धार्थकशब्दान् लिखत ।**

विदेशः, प्रच्छन्नम्, निन्दन्तु, अल्पम्, उपकारः, साधवः, रोहणम् ।

72B7U9